
# नवमः पाठः 9

## Lesson – 9

# सूक्तिसुधा

विश्वप्राचीनभाषासु पुरातना मधुरा मुख्या दिव्या अस्माकं संस्कृतभाषा। भारतीयसंस्कृतेः आधारसहिताः बहवः ग्रन्थाः संस्कृते सन्ति। यथा इतिहासौ, चत्वारः वेदाः, अष्टादश पुराणानि, पञ्चमहाकाव्यानि, आयुर्वेदः,धनुर्वेदः इत्यादयः। तेषु बहवः नीतयः मनुष्यं सुमार्गं नयन्ति। ततः अस्मिन् पाठ्यभागे केचन नीतयः प्रतिपाद्यन्ते।



**विद्याप्रशंसा -**

न चोरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ।। 1

### दानम् -

कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ।। 2

### न्यायमार्गः -

यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ।। 3

### मैत्री -

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्ध-परार्ध-भिन्ना
छायेव मैत्री खलसज्जनानाम् ।। 4

### कर्म -

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ।। 5

### कार्यसिद्धिः -

मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत् ।
मन्त्रवत् रक्षयेत् गूढं कार्यसिद्धिं प्रकाशयेत् ।। 6

### जाग्रता -

दुर्जनेन समं सख्यं वैरं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतो कृष्णायते करम् ।। 7

### गौरवम् -

वस्त्रेण वपुषा वाचा विद्यया विनयेन च ।
वकारैः पञ्चभिर्युक्तः नरो भवति पूजितः ।। 8



Unit 9.indd 61 06-06-2018 12:43:26

## सुजन-दुर्जन-स्वभावः -

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम् ।। 9

## शीलप्रशंसा -

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ।। 10

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. सुधा – nectar
2. वपुः – body
3. चोरः – thief
4. भ्राता – brother
5. तिर्यञ्चः – animals
6. मैत्री – friendship
7. विनयः – modesty
8. धेनुः – cow
9. वैरम् – enmity
10. कीर्तिः – fame
11. विदेशः – foreign
12. मतिः – intellect

### II.अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. करोति – लट् - प्रथमपुरुषः, एकवचनम् of कृ to do
2. यान्ति – लट् - प्रथमपुरुषः, बहुवचनम् of या to go
3. विमुञ्चति – लट् - प्रथमपुरुषः, एकवचनम् of मुञ्च् with वि to leave
4. दहति – लट् - प्रथमपुरुषः, एकवचनम् of दह् to burn
5. अस्ति – लट् - प्रथमपुरुषः, एकवचनम् of अस् to be
6. विन्दति – लट् - प्रथमपुरुषः, एकवचनम् of विन्द् to get



Unit 9.indd 62 06-06-2018 12:43:26

## III. अधो लिखितानां पदानां विग्रहं लिखत-

1. काव्यम् – ______________________
2. चोरहार्यम् – ______________________
3. महात्मनाम् – ______________________
4. अपन्थानम् – ______________________
5. मैत्री – ______________________
6. सज्जनानाम् – ______________________
7. खलसज्जनानाम् – ______________________
8. गौरवम् – ______________________
9. विद्याधनम् – ______________________

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. कर्णः + त्वचः = कर्णस्त्वचः
2. सोदरः + अपि = सोदरोऽपि
3. छाया + इव = छायेव
4. वा + अपि = वापि
5. मनसि + एकम् = मनस्येकम्
6. वचसि + एकम् = वचस्येकम्
7. कर्मणि + एकम् = कर्मण्येकम्
8. मनसि + अन्यत् = मनस्यन्यत्
9. वचसि + अन्यत् = वचस्यन्यत्
10. कर्मणि + अन्यत् = कर्मण्यन्यत्

## V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. मनः – चित्तम्
2. भाषा – वाणी
3. चोरः – तस्करः, दस्युः
4. राजा – नृपः, भूपालः
5. भ्राता – सोदरः
6. जीमूतः – मेघः
7. मैत्री – सख्यम्
8. माता – जननी
9. धेनुः – गौः
10. वैरम् – शत्रुता, विरोधः



Unit 9.indd 63 06-06-2018 12:43:26

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. मोक्षः × बन्धः
2. कीर्तिः × अपकीर्तिः
3. महात्मनाम् × दुरात्मनाम्
4. न्यायः × अन्यायः
5. देयम् × अदेयम्
6. गुर्वी × लघ्वी
7. पूर्वार्धः× परार्धः
8. सख्यम् × वैरम्
9. उष्णः × शीतः
10. गौरवम् × अगौरवम्

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. सर्वधनप्रधानं किम्?
2. "नास्यदेयं महात्मनाम्" – विवृणुत।
3. न्यायप्रवृत्तस्य प्रयोजनं किम् ?
4. खलसज्जनानां मैत्री कीदृशी ?
5. कर्म कथं कर्तारम् अनुगच्छति ?
6. कदा कार्यसिद्धिं प्रकाशयेत् ?
7. दुर्जनेन किमर्थं सख्यं वैरं च न कारयेत् ?
8. पञ्च वकाराः के ?
9. सुजन-दुर्जनस्वभावं लिखत।
10. सर्वत्र धनं किम् ?

## VIII. सविस्तरम् उत्तरं लिखत-

1. टिप्पणीं लिखत-
   (i) कार्यसिद्धिः (ii) दानम् (iii) जाग्रता
2. व्याख्यात-
   (i) विद्या (ii) शीलम् (iii) गौरवम्
3. विवृणुत-
   (i) न्यायमार्गः (ii) कर्म (iii) सुजन-दुर्जनस्वभावः



Unit 9.indd 64 06-06-2018 12:43:26

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥

यस्मिन् जीवति जीवन्ति बहवः स तु जीवति ।
काकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम् ॥

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुविभारभूताः
मनुष्यरूपेण मृगाश्चरन्ति ।।

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

*Sir William Jones in his third annual address before the Asiatic Socieyt, Calcutta, on February 2, 1786 (Asiatic Researches, vol.1, 1788, pp.422 f):-

“The Sanskrit language, whatever be it antiquity is of a wonderful structure; more perfect than the Greek, more copious than the Latin and more exquisitely refined than either.

## Weblinks :

1. Sanskrit slokas.com
2. https://sa.in.wikisource.org/wiki/सुभाषितानि
3. https://sa.in.wikisource.org/wiki/भर्तृहरिः



Unit 9.indd 65 06-06-2018 12:43:26